विश्वनाथभट्टदेकाशी
योगतरंगिणी११६

काश्यां संग्रहीतं भग
वानलालेन · संवत्
२९

यो.त. टी.

संख्या तिरोधः

धी २

स्या दिति भावः तस्मात् पुरुषार्थ... त्स्यत्य चिरोगशांतिः कर्तव्ये तिविवेकः ३

देह:३

॥श्रीकृष्णसन्निर्जितप्रतिराम श्रीगणेशायनमः कपोलविगलल्लोलदानपानीयपिच्छिलम् भ्रमद्भ्रमरझंकारं वंदे हेरंबदाननं १ श्रीमत्त्रिमल्लभट्टेन नाम्ना योगतरंगिणी चिकित्सा लिख्यते भूरि गुरुभ्यः स्वपरार्थिना २ देहादुत्पद्यते पुंसः पुरुषार्थचतुष्टयम् न नीरोगः स कुत्रापि तच्छक्नोति ततश्चिकित्सया ३ क्वचिद्धर्मः क्वचिन्मैत्री क्वचिदर्थः क्वचिद्यशः कर्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला ४ अतो मम श्रमस्तावच्चिकित्सायां जयत्ययम् सच्छिष्यास्संप्रयुक्तेयं संहिता भुवि जृंभताम् ५ रोगपंकार्णवे मग्नं यः समुद्धरते नरम् कस्तेन न कृतो धर्मः का च पूजा न सा हि ते ६ जन्मांतरकृतं पापं व्याधिरूपेण बाधते तच्छांतिरौषधैर्दानैर्जपहोमसुरार्चनैः ७ हारितात् शल्यं शालाक्यमेवं कुमारभरणं तथा कायभूतक्रिया वाजीकरणं रसायनम् ८ वैद्यो व्याध्युपसृष्टश्च भेषजं परिचारकः एते पादाश्चिकित्सायाः कर्मसाधनहेतवः ९ ज्ञातशास्त्रः शुचिः शूरो लघुहस्तः कृतागमः दृष्टकर्मा कृती धर्मी स भिषक्पाद उच्यते १० आढ्यो रोगी भिषग्वश्यो दृष्टिमान् ज्ञापको रुजाम् असर्व

कायचिकित्सा ... प्रकारैरिक्तो भवति ... इति

एकः कर्दमपापद्यो

चत्वारः चिकित्सापादा वैद्यद्रव्यादिना ... दि शास्त्रानैव विवृणोति ज्ञातैत्यादिनाच तुर्णामिति विशेषः २ रोगी अपरो द्वितीयः पादः १ औषधकत्वविशेषादिः १

विधाचिकित्सा ४

रा ६ नेत्रोमभेदः १ कृष्ण

स्तुरांसंप ... रोमस्तु द्युतौ ... गीन स्यादित्यर्थः ... अन्यथा ... चिकि

त्वरुणः पथ्यशीलः पादः परो मतः ११ दोषकालबलोद्देशमात्राप्रकृतिरेतसाम् साम्यं यद्भेषजं तत्स्यात्पादः पादश्चिकित्सिते १२ अवहाशी जितस्वेदो हितो धर्मार्थकोविदः दृढदर्शी किमेदस्थः पादः स्यात्परिचारकः १३ वातः पित्तं कफश्चेति त्रयो दोषाः समासतः विकृताविकृता देहं घ्नंति ते वर्तयंति च १४ चयप्रकोपप्रशमाः वायोर्ग्रीष्मादिषु त्रिषु वर्षादिषु च पित्तस्य श्लेष्मणः शिशिरादिषु १५ ते व्यापिनोपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः वयोऽहोरात्रभुक्तानामंतमध्यादिगाः क्रमात् १६ जांगलं वातभूयिष्ठमानूपं तु कफोल्बणम् साधारणं सममलं त्रिधा भूदेशमादिशेत् १७ मात्राश्चतुर्विधा त्वेषा समा मंदा च तीक्ष्णका विषमा चेति संप्रोक्ता तल्लक्षणविशेषतः १८ शुक्रार्तवस्थैर्जन्मादौ विषेणेव विषक्रिमेः तैः स्युः प्रकृतयस्तिस्रो हीनमध्योत्तमाः पृथक् १९ मलायत्तं बलं पुंसां शुक्रायत्तं तु जीवितम् अतश्चिकित्सितं कार्यं संरक्ष्यमलरेतसी २० जातमात्रश्चिकित्स्यस्तु नोपेक्ष्योऽल्पतया गदः वह्निशस्त्रविषैस्तुल्यः स्वल्पोपि विकरोत्ययम् २१ यावज्जीवं चिकित्स्यस्तु नोपेक्ष्यो भिषजा गदः कदाचिद्दैवयोगेन दृष्टारिष्टोपि जीवति २२ चिकित्सितं शरीरं यो न निष्क्रीणाति दुर्मतिः स यत्करोति सुकृतं

तत्सर्वंभिषगाचरेत् २३ नैवकुर्वीतलोभेनचिकित्सापण्यविक्रयम् ईश्वराणांवसुमतांलिप्सेतार्थं
तुवृत्तये २४ रोगमादौपरीक्षेत ततोनंतरमौषधम् ततःकर्मभिषक्कुर्याज्ज्ञानपूर्वंचिकित्सकः
२५ कर्मप्रकोपजाःकेचित्केचिद्दोषप्रकोपजाः कर्मदोषोद्भवाःकेचिन्मनःकायस्थितागदाः २६
कर्मक्षयात्कर्मकृतादोषजाःस्वस्वमौषधैः कर्मदोषोद्भवायांतिकर्मदोषक्षयात्क्षयम् २७ य
थाशास्त्रंतुनिर्णीतोयथाशास्त्रंचिकित्सितः नशमंयातियोव्याधिःसज्ञेयःकर्मजोबुधैः २८
पुरोपक्रमभेषजैःशांतास्तेज्ञेयाःकर्मदोषजाः विज्ञेयादोषजास्त्वन्येकर्मजावाप्यसंकराः २९
रोगास्तुदोषवैषम्यंदोषसाम्यमरोगता निजागंतुविभेदेनतेचरोगाद्विधामताः ३० एभिःत्रि
एभिर्जायतेशरीरेधातवःसमाः साचिंत्याविकाराणांकर्मतोद्विजजांमतम् ३१ स्वेहत्स्प २ कृष्ण
चितान्दोषान्सामान्रसपथानुगान् रसमामंपाचयित्वाकुर्याद्दोषान्पृथक्पृथक् ३२ सप्त
पाचनैर्जयेत्तान्नचेद्दोषान्विपाचयेत् दोषपाकोधातुपाकोन्मरणंसर्वथान्नरणाम् ३३ विकार
नामाकुशलोनजिह्रीयात्कदाचन नहिसर्वविकाराणांनामतोऽस्तिध्रुवास्थितिः ३४ दर्शन

स्पर्शनप्रश्नैर्व्याधिज्ञानंत्रिधामतम् आतुरादिदृशास्पर्शाच्छीतादिप्रश्नतोपरम् ३५ स्वभावाद्व्या
धयःसाध्याःकेचिद्याप्याउपेक्षिताः साध्यायाप्यत्वमायांतियाप्याश्चासाध्यतांतथा ३६ निवृत्तोऽपि
पुनर्व्याधिःस्वल्पेनायातिहेतुना दोषैर्मार्गीकृतेदेहेशोषःसूक्ष्मइवानलः ३७ व्याधेस्तत्त्वपरि
ज्ञानंवेदनायाश्चनिग्रहः एतद्वैद्यस्यवैद्यत्वंनवैद्यःप्रभुरायुषः ३८ नास्तिरोगोविनादोषैर्यस्मा
त्तस्माद्विचक्षणः अनुक्तमपिदोषाणांलिंगैर्व्याधिमुपाचरेत् ३९ यथाहतीसटाचार्यः
वातस्यपित्तस्यकफस्यचापिविकारिणःकायवतांहिकोपे प्रकोपहेतुःकुपितस्यलिंगंचि
कित्सितंचेतिनिरूपणीयम् ४० रूक्षैःशीतैःकषायैःकटुभिरनशनैर्वेगसंधारणैश्चव्या
यामैश्चव्यवायैःप्लवनरसबलवद्विग्रहैर्जागरैश्च श्यामानीवारकंगुप्रभृतिभिरशनैर्ल्लसद्भिः
पर्यादेभुक्तेजीर्णेचजंतोरितिभवतितनोर्मारुतस्यप्रकोपः ४१ कट्वम्लोष्णविदाहितीक्ष्णल
वणक्रोधोपवासातपस्त्रीसंपर्कतिलातसीदधिसुरासुक्तारनालादिभिः भुक्तेजीर्यतिभो
जनेचशरदिग्रीष्मेसतिप्राणिनांमध्याह्नेचतथार्द्धरात्रिसमयेपित्तप्रकोपोभवेत् ४२

तत्सर्वं भिषगश्नुते २३ नैवकुर्वीत लोभेन चिकित्सापण्यविक्रयम् ईश्वराणां वसुमतां लिप्सेतार्थं
तु वृत्तये २४ रोगमादौ परीक्षेत ततोनंतरमौषधम् ततः कर्म भिषक्कुर्यात् ज्ञानपूर्वं चिकित्सितम्
२५ कर्मप्रकोपजाः केचित्केचिद्दोषप्रकोपजाः कर्मदोषोद्भवाः केचिन्मनःकायस्थितागदाः २६
कर्मक्षयात्कर्मकृता दोषजाः स्वस्वभेषजैः कर्मदोषोद्भवायांति कर्मदोषक्षयात्क्षयम् २७ य
थाशास्त्रं तु निर्णीतो यथाशास्त्रं चिकित्सितः न शाम्यति यो व्याधिः स ज्ञेयः कर्मजो बुधैः २८
पुरोपक्रमभेषजैः शांतास्ते त्रेधाः कर्मदोषजाः विज्ञेया दोषजास्त्वन्ये कर्मजा वाप्यसंकराः २९
रोगास्तु दोषवैषम्यं दोषसाम्यमरोगता निजागंतुविभेदेन ते च रोगा द्विधा मताः ३० एभिः त्रि
पराभिर्जायते शरीरे धातवः समाः साचिंत्या विकाराणां कर्मतो द्विजजां मतम् ३१ स्वहेतुप २ कृष्ण
चितादोषान्सामान्रसपथानुगान् रसमामं पाचयित्वा कुर्याद्दोषान्पृथक्पृथक् ३२ सएव
पाचनैर्जेयान्नचरोगान्विपाचयेत् दोषपाको धातुपाको मरणं सर्वधान्वराणाम् ३३ विकार
नामकुशलो न जिह्रीयात्कदाचन नहि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः ३४ दर्शन

स्पर्शनप्रश्नैर्व्याधिज्ञानं त्रिधा मतम् आयुरादि दृशा स्पर्शाच्छीतादि प्रश्नतोऽपरम् ३५ स्वभावाद्व्या
धयः साध्याः केचिद्याप्या उपेक्षिताः साध्या याप्यत्वमायांति याप्याश्चासाध्यतां तथा ३६ निवृत्तोऽपि
पुनर्व्याधिः स्वल्पेनापीति हेतुना दोषमार्गीकृते देहे शेषः स्वल्प इवानलः ३७ व्याधेस्तत्त्वपरि
ज्ञानं वेदनायाश्च निग्रहः एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ३८ नास्ति रोगो विना दोषैर्यस्मा
त्तस्माद्विचक्षणः अनुक्तमपि दोषाणां लिंगैर्व्याधिमुपाचरेत् ३९ पथ्याहृतान्याचार्यैः
वातस्यापि पित्तस्य कफस्य चापि विकारिणः कायवर्ता हि कोप प्रकोपे हेतुः कुपितस्य लिंगं चि
कित्सितं चेति निरूपणीयम् ४० रूक्षैः शीतैः कषायैः कटुभिरनशनैर्वेगसंधारणाद्यैर्व्या
यामैश्चाप्यपायैः प्रतरणबलवद्विग्रहैर्जागरैश्च श्यामानीवारकंगुप्रभृतिभिरशनैस्तल्लसीद्भिः
पर्याये भुक्तजीर्णे च जंतोरिति भवति ततो मारुतस्य प्रकोपः ४१ कट्वम्लक्षारविदाहितीक्ष्णल
वणक्रोधोपवासातपस्त्रीप्रसक्तिव्रत्तातसीदधिसुरासूक्तारनालादिभिः भुक्ते जीर्यति मा
ध्ये च शरदि ग्रीष्मे सति प्राणिनां मध्याह्ने च तथार्द्धरात्रिसमये पित्तप्रकोपो भवेत् ४२

गुरुमधुरातिशीतदधिदुग्धनवान्नपयस्तिलविकृतीक्षुभक्षलवणातिदिवाशयनैः समविषमाशनाध्य
शनपायससर्पिष्कैस्तैरपि च कफः प्रकुप्यति मध्याह्ने दिनादिके च ४३ इति प्रकोपकारणैः प्रकोपमेत्य
सर्वगाः समीरणाद्यास्तनौ रुजः सृजन्ति जन्तुषु ४४ वातपित्तकफकोपकारणान्यत्र चिंतयेदिह सूत्र ३
संग्रहे प्रोच्यते तदिह सांप्रतं मया रूपपरीक्षणमनेन कारयेत् ४५ द्दशिरशिरसि च शंखकर्णनेत्र
नेत्रांतरेषु भ्रुवि हृदि हनुमन्यास्कंधमूर्धार्धसंधौ रुगतितनिशि दिवा न्यास्यादकस्मात् सुप्त
ता भवति च भुजजंघास्तब्धसंकोचता च ४६ कटिविटपपृष्ठे क्रोष्टि च पृष्ठे जठरव घ
रावस्ताः कुक्षिकक्षांतरेषु प्रसरति गुरुशूलं नाभिवस्तिस्तनेषु त्रिकवलिगुदगुह्योपांतपक्षद्वये ३
षु ४७ वदने विरसता स्याद्दुर्बलः कर्कशांगो भवति वपुषि कंपो रात्रिनिद्राविनिर्तैः त्वचि च परु पूर्व
षतास्यात्क्षमात्मवैषम्यमंगेनरैरिति पवनविकारे लक्षणं लक्षणीयम् ४८ भ्रममदमुखशोषस्वे
दसंतापमूर्छामुखनयननखत्वङ्मूत्रविट्पीतता प्रलपनमतिसारश्चारुचिश्च ज्वरश्च लडति च
शिशिरेच्छा पित्तरोगस्य लिंगम् ४९ अंगस्य गौरवमपास्तमनोऽतरोग्नेर्हृल्लेशता च हृदयस्य मुखं

पूर्व ४

कफवातौ कफवातौ द्वौ रसौ मधुरसुवे आद्याद्यास्तु यो मधुराम्ललवणास्ते वर्द्धि समीयते गच्छतः शमं यातित्यर्थः तथा वातकफौ अन्त्यौ त्रिलिकटु तिक्त
कषायैः प्रकोप समीयते तथैव पित्तं आद्याद्यावरैस्त्रिभिः आद्यो मधुरो रसस्तत्परे शम्ललवणौ वर्द्धिकरद तिक्त कषायैः शमं यातित्यर्थः आद्याद्यावितिः
अन्त्याद्यौ त्रयो कटुतिक्त कषायाः मधुराम्ललवणाद्रुतिर्द्धौ आद्यौ मधुराम्लौ तौ कफमेलपूर्वकं च समानयतः तथाद्यौ त्रिकौ मधुराम्ललवणौ अध्यम अन्त्य
द्यौ आद्यौ लवण लवणकटू कालादि तरे मधुरतिक्त कषायाः एतौ त्रिकौ मध्यम अल्पं पित्तं प्रकोपशमौ क्रमेण नयतं इत्यर्थः आद्यम अन्त्य नय अन्त्यौ मितिमधुरर

प्रसेकः आलस्यमास्यमधुरत्वमकांडकंडूरापांडुताऽनपनयो रतिलोमहर्षः ५० प्रज्ञाधृतिर्वमथुपीनसकास
तंद्रानिद्राद्यपच्छलचुतापनमुल्बणाश्च स्यादोषकं रसनारदमदृतालु घ्राणोत्तमा श्रवणशक्तिकांत
रेषु ५१ श्लेष्मोल्बणो भवति लिंगमिदं नराणां संसर्गजेषु च गदेषु भवेद्विदोषम् तथा चोक्तम् कफवातौ
वातकफौ यातः पित्तं च वृद्धिशमौ त्रिभिरोषैस्त्रिभिर्दोषैस्त्रिभिरापपरैस्तदन्यथा अल्पाधावाध्यमाधा
त्यावंसं कोपशमौ मतं मध्यमध्येतौ मध्यं प्रयोगान्न्यतस्त्रिकौ रात्र्यहोरात्रिमध्यांते पुनश्चाल्पाद्यम दि ४
ध्यमे मध्ये चांते तथा दोषेच दोषेणोत्पातिरूक्ष्मात भुक्ते जीर्यति जीर्णान्ने जीर्णे भुक्ते च जीर्यति
जीर्णाजीर्णेति भुक्ते च दोषेणोत्पाति वल्लरूकं कफपित्तानिलाः पूर्वमध्यांते च व्यवस्थिताः देहाहोरात्र
वयसां संधिष्वपि कफानिलौ आदावंते च दोर्विदंपविसर्गादानयोर्नृणाम् मध्ये मध्यवलं चैते क्रोष्टमा
दोषनिर्दिशेत् इति चरकात् हेत्वादि रूपाकृति सात्म्यजातिभेदैः समीक्ष्यातुरसर्वरोगान् चिकि
त्सितं कर्षराधरणाद्यं कुर्वीत वैद्यो विधिवत्सुयोगैः दिव्यौषधीनां बहवः प्रयोगा वंदारकाराणाभिवधि
स्फुरंति ज्ञात्वेति संदेहमपास्य धीरैः संभावनीया विविधप्रयोगाभावाः स्वाभाविकागंतुककोपिको

रसाद्यौ वातौ मध्ये पित्तं शमे नयति अन्त्यौ कफे प्रकोपय ति एवमाद्यौ रसाः अन्त्यौ वा ते समयति म ध्याः पित्तं कफ कोपमतौ अर्थः

नृणां रोगा भवेयुः किल्बिककर्मदोषजाः तच्छेदनार्थं दुरितापहारिणः श्रेयो मया प्रोक्तयोगवरान्नियोजयेत् पूर्वार्जिताघात्
तत्र तावदनिलः शाम्यते स्निग्धनास्तिपरिखेकनिरूहैः भुक्तमात्रवतदेन नराणां मोदनेन मधुमासरसेन दाह्य
पाणि फलपानियत्ताचस्वसनेनरूधिभिः स्तुतिभिश्च सर्पिषाचामितयापयसा च स्वादुना भवति पित्तनिवृ
त्तिः लंघनेनवमनेन पथ्यान्नप्राशनेन शिरसः प्रविरेकैः कटुफलादिकवलैरहिमाभिरद्भिस्तत्र शाम्यतेति
कफः चिकित्साकलिकातः इति योगतरंगिण्यां गूढार्थदीपिकायां तरंगः १ प्रथमः अथ परिभाषा
न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित् अतः प्रयोगसिद्ध्यर्थं मानमत्रोच्यते मया मानं च द्विविधं प्रोक्तं
कालिंगं मागधं तथा कालिंगान्मागधं श्रेष्ठमिति मानविदो विदुः त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः
त्रसरेणुस्तु पर्यायो नाम्ना वंशी निगद्यते जालांतरगतैः सूर्यकरैर्वंशी विलोक्यते षड्वंशीभिर्मरीचिः स्यात्ता
भिः षड्भिश्च राजिका तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः यवोऽष्टसर्षपैः प्रोक्तो गुंजा स्यात्तच्चतुष्ट
यम् षड्भिश्च रक्तिकाभिः स्यान्माषको हेमधान्यकौ माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते टंकः स
एव कथितस्तद्द्वयं कोल उच्यते क्षुद्रको वटकश्चैव द्रंक्षणः स निगद्यते कोलद्वयं च कर्षः स्यात्स प्रोक्तः
पाणिमानिको अक्षः पिचुः पाणितलं किंचित्पाणिश्च तिंदुकम् विडालपदकं चैव तथा षोडशिका मता ६ कृष्ण

करमध्यो हंसपदं सुवर्णं कवलग्रहः ॥ उदुंबरं च पर्यायैः कर्ष एव निगद्यते ॥ स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका मता ॥ शु
क्तिभ्यां च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका प्रकुंचः षोडशी बिल्वं पलमेवात्र कीर्त्यते पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतं च
निगद्यते प्रसृतिभ्यामंजलिः स्यात्कुडवोऽर्द्धशरावकः अष्टमानं च स ज्ञेयः कुडवाभ्यां च मानिका शरावोऽष्टपलं
तद्वत् ज्ञेयमत्र विचक्षणैः शरावाभ्यां भवेत्प्रस्थश्चतुःप्रस्थैस्तथाढकं भाजनं कंसपात्रं च चतुःषष्टिपलश्च
सः चतुर्भिराढकैर्द्रोणः कलशो नल्वणोऽर्मणः उन्मानं च घटो राशिर्द्रोणपर्यायसंज्ञितः द्रोणाभ्यां शूर्पकुं
भौ च चतुःषष्टिशरावकः शूर्पाभ्यां च भवेद्द्रोणी वाहो गोणी च सा स्मृता द्रोणीचतुष्टयं खारी कथिता सूक्ष्म
दर्शिभिः चतुःसहस्रपलिका षण्णवत्यधिका च सा पलानां द्विसहस्रं च भार एकः प्रकीर्तितः तुलापलशतं
१ ज्ञेयं सर्वत्रैवैष निश्चयः माषटंकाक्षबिल्वानि कुडवः प्रस्थमाढकं राशिर्गोणी खारिकेति यथोत्तरचतु
र्गुणाः गुंजादिमानमारभ्य यावत्स्यात्कुडवस्थितिः द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतं प्रस्थादिमा
नमारभ्य द्विगुणं तद्द्रवार्द्रयोः मानं तथा तुलायास्तु द्विगुणं न क्वचित्स्मृतं मृद्वृक्षवेणुलोहादेर्भांडं यच्चतु
रंगुलं विस्तीर्णं च तथोच्चं च तन्मानं कुडवं वदेत् यदौषधं तु प्रथमं यस्य योगस्य कथ्यते तन्नाम्नैव स
योगो हि कथ्यते क्वचिदन्यथा इति मागधपरिभाषा यवो द्वादशभिर्गौरसर्षपैः परिकीर्तितः यवद्वये

५ नगुंजास्याद्विगुंजोवल्लउच्यते माषोगुंजाभिरष्टाभिःसप्तभिर्वाभवेत्क्वचित् स्याच्चतुर्भिर्माषकैःशाणःसनिष्कःटं
कएवच गद्याणोमाषकैःषड्भिःकर्षःस्याद्दशमाषकः चतुःकर्षैःपलंप्रोक्तंदशशाणाभिधंबुधैः चतुःपलैश्च
कुडवंप्रस्थाद्याःपूर्ववन्मताः इतिशार्ङ्गधरात् इतिकालिंगपरिभाषा त्रुटिःस्यादणुभिःषड्भिस्ताःषड्लिक्षाः
समीरिता ताभिःषड्भिर्भवेद्यूकाषड्यूकाभिर्यवोमतः जालांतरगतैःसूर्यकरैर्वंशीविलोक्यते तस्यनामांत
रंत्रैयंत्रसरेणुरजस्तथा अथकुडवोत्रेयात् रजोभिस्त्रीशिराश्चिकतालाभिःषोडशभिस्तथा सर्षपश्चभवेद्गौरस्ते
र्यावोतंडुलंविदुः तद्द्वयंधान्यकंमाषंतत्त्रयंरक्तिकामता रक्तिकाद्वितयेनापिवल्लःप्रोक्तोविशारदैः चतुर्भिश्चा
ट्टिकोत्तैःस्यादेवंमानपरंपरा इतियोगतरंगिण्यांपरिभाषाकथनंनामद्वितीयस्तरंगः अथयुक्तायुक्तकं
नवान्येवहियोज्यानिद्रव्याण्यखिलकर्मसु विनाविडंगकृष्णाभ्यांगुडधान्याज्यमाक्षिकैः गुडूचीकुट
जोवासाकूष्मांडश्चशतावरी अश्वगंधासहचरःशतपुष्पाप्रसारिणी प्रयोक्तव्याःसदैवार्द्राद्विगुणान्नै
वकारयेत् शुष्कंनवीनंयत्द्रव्यंयोज्यंसकलकर्मसु आर्द्रंचद्विगुणंयस्यस्यादेषसर्वत्रनिः
श्चयः कालेऽनुक्तेप्रभातंस्यादंगेऽनुक्तेजटाभवेत् भागेऽनुक्तेहिसाम्यंहिपात्रेऽनुक्तेतुमृन्मयं ५ तृ.स.
एकमप्यौषधंयोगेयस्मिन्यत्पुनरुच्यते मानतोद्विगुणंप्रोक्तंतद्द्रव्यंतत्त्वदर्शिभिः ॥ ७

मानतोद्विगुणंप्रोक्तंतद्द्रव्यंतत्त्वदर्शिभिः गुणहीनंभवेद्वर्षादूर्ध्वंतद्रूपमौषधम् मासद्वयात्तथाचूर्णं
हीनवीर्यत्वमाप्नुयात् हीनत्वंगुटिकालेहौलभेतेवत्सरात्परम् हीनाःस्युर्घृततैलाद्याश्चतुर्मासाधि
कात्तथा ओषध्योलघुपाकाःस्युर्निर्वीर्यावत्सरात्परम् पुराणाःस्युर्गुडक्षौद्रासवाधातवोरसाः
व्याधेरयुक्तंयद्द्रव्यंगणोक्तमपितत्त्यजेत् अनुक्तमपियद्युक्तंयोजयेत्तत्रतद्बुधः शार्ङ्गधरात् वज्रा
भावेतुवैक्रांतःस्वर्णाभावेतुमाक्षिकम् हेममाक्षिकजंसत्त्वंमतंहेमसमंगुणैः विमलंमाक्षिकेऽप्येवंध्रुवं
रजतवद्गुणैः मुक्ताभावेक्षिपेन्नूनंमुक्ताशुक्तिंचतद्गुणाम् अभावेभस्मसत्त्वस्यकांतलोहंप्रयोजयेत् कांता
भावेतीक्ष्णलोहमित्युक्तंरसदर्पणे अभावेमधुनोयोज्यागुडोजीर्णश्चतद्गुणः सिताभावेभवेत्खंडःशा
ल्यभावेचषष्टिका असंभवेतुद्राक्षायाःप्रदेयंकाश्मरीफलम् वृक्षाम्लंनभवेद्यत्रदाडिमाम्लंनियोजयेत्
वेतसाम्लस्यचाभावेहरिमंथाम्लमादिशेत् अभावेचंदनस्यापिभिलेपद्रक्तचंदनम् अभावेसीतिपित्तानां
रसादेर्भावनाविधौ त्रिफलाष्टिककषायेणतद्गुणाभावनाभवेत् गोरस्तैः मेदाजीवककाकोलीद्वन्द्वाभावे
प्रयोजयेत् पृष्ठीविदार्यश्वगंधावल्लीवाराहिकानवाः वैद्यालंकारात् फलमामसपुष्पंचत्यजेद्बिल्वादि
तसदाद्राक्षाबिल्वशिवादीनांफलंमुख्यंगुणोत्तरम् आदिशब्दाद्बिभीतकीपर्पटकादेरपिग्रहः अतः

संमार्जनैर्मेदास्थानेयोज्याण्यानिका वहिः संमार्जनैर्मेदाघ्नजमोदे वगढ्यते अंतः संमार्जनेयोज्यंवस्था
स्थानेकुलिंजनं वहिः संमार्जनैस्तैव प्रयोज्याचमनोर्मिभिः कुस्मजीरकसंयोगोनकर्त्तव्या भस्य भेजजे
तस्यस्थानेविधातव्याजीरकः कुधान्येः सदा सारभ्रस्वदिरादीनां निंवादीनांत्वचः स्मृताः फलंच दा
डिमादीनां पटोलादेर्दलंमतम् भद्रश्रीन्नकारात् क्वचित्पत्रं क्वचिन्मूलं क्वचित्पुष्पं क्वचित्फलम् क्वचि
द्वीजं क्वचिद्वल्कं क्वचित्क्वाथं क्वचिज्जलम् क्वचिन्नालंयोजनीयं क्षीरं चारं क्वचित्तरं पंचैकंस्याव
धुस्येवपथ्यायां प्रयोजयेत् अर्धं सिद्धरसस्यं तैलघृतयो लोहस्यभागो ध्मः सीसिद्धारिवलेहच
र्णगुटिकादीनां तथासमः योदीयते भिषग्वरायसरस्वानिर्दिश्य धन्वंतरिं देहारोग्यसुखाप्तये
निगदितोभागोऽसधन्वंतरिः क्रीतद्रव्यस्य भेषज्यभागस्त्वेकादशोमतः कीशाभ्यां घृते वै षे ६
ष्टभागः सकथ्यते गृहीत्वाधिकमीशांशाद्यासमीचीनभेषजम् दापयेल्लुब्धहृदयः स कौमु
स्याद्विश्वासघातकः वैद्यालकारात् इतियोगमुक्तादिकथनं अतरंगः स्नेहाद्याश्च कथ्यंते येऽगा
रोगापघातकाः स्नेहश्चतुर्विधः प्रोक्तो घृतंतैलंवसातथा मज्जाचतं पिबेन्मर्त्यः किंचिदभ्युदिते रवौ

स्थावरोजंगमश्चेति द्विधायोनिः स्नेह उच्यते तिलतैलं स्थावरेषु जंगमेषु घृतंवरम् द्वाभ्यांत्रिभिश्च
तुर्भिस्तैर्यमकस्त्रिवृतो महान् पिवेत्त्र्यहं चतुरहं पंचाहं षडहं तथा सप्तरात्रात्परं स्नेहः सात्मी भवति से
वितः देशकालाग्निवयसां बलं दृष्ट्वा प्रयोजयेत् हीनांच मध्यमां ज्येष्ठां मात्रां स्नेहस्य बुद्धिमान्
अमात्रया तथा काले मिथ्याहारविहारतः स्नेहः करोति शोफार्शः स्नेहनिद्राविसंज्ञताः [illegible]पादी
प्तान्ने[illegible]मात्रा स्नेहस्य परसंमिता मध्यमा च त्रिकर्षा स्यात्[illegible] केवलं
पैत्तिके सर्पिः वातिके सैंधवान्वितम् पेयं बहुकफे चापि व्योषक्षारसमन्वितम् रूक्षक्षत
विषार्त्तानां वातपित्तविकारिणाम् हीनमेधास्मृतीनां च सर्पिःपानं प्रशस्यते कृमिको
ष्ठानिलाविष्टाः प्रवृद्धकफमेदसः पिवेयुस्तैलसात्म्याश्च तैलं दार्ढ्यार्थिनश्च ये व्यायामकर्शि धौ ४
ताः शुष्करेतोरक्ता महारुजः महाग्निमारुतप्राणा वसायोग्या नरा मताः क्रूराशयाः
क्लेशसहा वातार्त्ता दीप्तवह्नयः मज्जानमापिवेयुस्ते सर्पिर्वा सर्वतो हितम् शीतकाले दि
वा स्नेहमुष्णकाले पिवेन्निशि वातपित्ताधिके रात्रौ वातश्लेष्माधिके दिवा [illegible] नस्याभ्यं

जत्रुगंडूषमूर्धकर्णाक्षितर्पणे: तैलं घृतं वा युंजीत दृष्ट्वा दोषबलानलम् घृते कोष्णं जलं पेयं
तैले यूषः प्रशस्यते वसामज्ज्ञोर्विधौ मंडमनुपानं सुखावहम् वृद्धबालकृशा रूक्षाः क्षीणा
स्राः क्षीणरेतसः वातार्त्तास्तिमिरार्त्तश्च तेषां स्नेहनमुत्तमं रूक्षस्य स्नेहनं स्नेहैरतिस्निग्धस्य
रूक्षणं भक्तच्छंदो मुखस्रावो गुदे दाहः प्रवाहिका तंद्रातीसारपांडुत्वं भृशं स्निग्धस्य लक्षणं
श्यामाकचणकोद्दालकभक्तपिण्याकसक्तुभिः रूक्षणं कारयेद्दत्तैर्यथादोषं यथाबलम्
स्नेहव्यापत्सु शीतैर्वेगाघातप्रजागरात् दिवास्वप्नमभिष्यंदि रूक्षान्नं च विवर्जयेत्
शार्ङ्गधरात् अथ स्नेहपाकः विधिः शास्त्रे त्रपालो वल्कमपि प्रभवासरे पूजयित्वा तैलस्या ७ कृष्ण
ज्यस्य किंवा रचयतु निपुणाः संस्कृतिं संप्रदायात् आदौ वह्निं प्रदद्यात् घृतबधिशानैकैः शब्द
फेनक्षयः स्यात्स्यफ्राम पिंडेके तद्दशाभिरलघुभिर्नोति पीनोर्विशोध्य एवं संस्थाप्य घृतं
विधिवदथ पचेद्वासरादग्निमानात् क्वाथे दुग्धे च कल्के तदनु सुरभिभिः शोधनीये विशो
ध्यम् कस्तूरीचंदनमंशो जलजजलदसटीरक्तपाटीरकुष्ठलवंगजिष्ठातुरुष्कागुरुनखरद

सपदमाहजनकवाज१

लवंगतकंकोलमुस्तैः सारसंगृह्य तैलं कृत्वा कटाहे विमलदृढतरे मंदमंदानलेस्तत्पक्वे निःफेन
भावं व्रजति किल यदा शोसभावं ततस्तु मंजिष्ठाराशिलोध्रैर्जलधरतनुकैः साम्लैः सामृप्यैः स
चीपुष्पाघ्रिनीरैरूपहितमथितैस्तैल गंधं जहाति तैलस्यंदुकलाशकैकविकसाभागास्तु तस्यां
शिकाये चान्ये पिवरापयोदरजनी द्विविरोधायुपः आम्रजंबूकपित्थानां बीजपूरकबिल्वयोः
शोधनं तिलतैलस्य पल्लवानां तु पंचकम् जलस्नेहौषधीनां च प्रमाणं यत्र नोदितम् तत्र स्या
दौषधात्स्नेहः स्नेहात्क्वाथश्चतुर्गुणः स्नेहाच्चतुर्गुणं क्वाथ्यं सदा स्नेहं स विज्ञो चतुर्गुणं जलं
जलं दत्वा क्वाथः क्वाथ्यसमो मतः चरकात् उक्तं च कल्काच्चतुर्गुणः स्नेहः स्नेहात्क्वाथश्चतुर्गु
णः क्वाथ्याच्चतुर्गुणं वारि क्वाथः क्वाथ्यसमो मतः मंदे चतुर्गुणं देयं कठिने षड्गुणं जलम्
कठिनात्कठिने द्रव्ये वारि षोडशभागिकं स्नेहकल्को यदांगुल्या वर्तितो वर्त्तिवद्भवेत् वह्नौ क्षि
प्तश्च नो शब्दस्तदा सिद्धिं विनिर्दिशेत् अन्यत्तः शब्दव्युपरमे प्राप्ते फेनस्योपशमे तथा गंधव
र्णरसादीनां संपत्तौ सिद्धिमादिशेत् घृतस्यैवं विपक्वस्य तैलस्य कुशलो भिषक् फेनोद्गमे

तैलस्य शेषं च तद्वदादिशेत् पाकस्तस्माद्बलीतः अकल्कपायद्द्रव्याणां कठिनानां विचारतः क्वाथो
विधीयते ऽन्येषां कल्क एव भिषग्द्रुतः वैद्यालंकारात् आदौ संचारयेत्स्नेहं पुनर्द्रव्यकल्कं ततः क्रमा
त् ततोऽन्यत्सुरभिद्रव्यमेष स्नेहविधौ क्रमः मतिमुकुरात् क्षीरं स्नेहसमं दद्याद्नुक्ते स्नेहसंविधौ
शाकद्रवं मांसरसं मत्स्यं सौवीरकादिकम् स्नेहाद्दशगुणं देयं जलं चाद्विगुणं क्षिपेत् अश्रीवृष्टिः
कर्त्तव्यः पाकोगंधाबुकं ततः चंद्रकस्तूरिकादीनां सहस्रांशं प्रयोजयेत् पुष्याणि गंधनिर्यासं
सिद्धे शीते ऽवतारिते चस्कात् द्रव्यतिषे भवेत्कल्कः क्वाथो निःक्षिपितो मतः स्नेहपाकस्त्रिधा
पाकोध प्रोक्तो मृदुर्मध्यः खरस्तथा ईषत्सरसकल्कस्तु स्नेहपाको मृदुर्भवेत् मध्यपाकस्य संसिद्धिः क ८
ल्केनीरसकोमले ईषत्कठिनकल्कश्च स्नेहपाको भवेत्खरः तदूर्ध्वं दग्धपाकः स्याद्दाहकृन्निः कुंकुम
प्रयोजनः अतिपाकश्च निर्वीर्यो वह्निमाद्यकरश्च सः नस्यार्थं स्यान्मृदुः पाको मध्यमः स
र्वकर्मसु अभ्यंगार्थे खरः प्रोक्तो युञ्ज्यादेवं यथोचितम् घृततैलगुडादींस्तु साधयेन्नैकवास
रे प्रकुर्वन्त्युषितास्ते हि विशेषान्मधुरासंचये शार्ङ्गधरात् इति स्नेहपाकविधिः ४ तरंगः ॥

अथ पंचकर्माणि तत्र स्वेदः स्वेदश्चतुर्विधः प्रोक्तस्तापोष्मस्वेदसंज्ञितौ उपनाहोद्रवः स्वेदाः
सर्वे वातार्तिहारिणः स्वेदौ तापोष्मजौ प्रोक्तौ श्लेष्मघ्नौ समुदीरितौ उपनाहस्तु वातघ्नः पित्तसंगे
द्रवो हितः महाबले महाव्याधौ शीते स्वेदो महान्मतः दुर्बले दुर्बलः स्वेदो मध्ये मध्यतमो मतः
स्वेद्याः सर्वे त्रयोपि हि भगंदर्यर्शसां तथा अश्मर्याश्चातुरो जंतुः समये शास्त्रकर्मणः यन्त्रात्स्वेद्यो
गतेऽप्यस्य मूढगर्भे गदे तथा कालप्रसूतां कालेवाप मूढा स्वेद्या नितंबिनी सर्वान्स्वेदान्निवाते च
जीर्णाहारस्य कारयेत् स्विद्यमानशरीरस्य हृदयं शीतलैः स्पृशेत् स्नेहाभ्यक्तशरीरस्य शीतै
राच्छाद्य चक्षुषी अजीर्णी दुर्बलो मेही क्षतक्षीणः पिपासितः अतीसारी रक्तपित्ती पांडुरोगी
तथोदरी मद्यार्त्तो गर्भिणी चैव न हि स्वेद्या विजानता एतानपि मृदुस्वेदैः स्वेदसाध्यानुपाचरे
त् मृदुस्वेदं प्रयुंजीत तथा हृन्मुष्कदृष्टिषु अतिस्वेदात्संधिपीडा दाहस्तृष्णा क्लमो भ्रमः पित्ता
सृक्पिडिकाकोपस्ततः शीतैरुपाचरेत् तेषु तापाभिधः स्वेदो वालुकावस्त्रपाणिभिः प्रस्तरे
रमृसिक्ते च कापैरल्लकवेष्टितैः अथवा वातनिर्नाशिद्रव्यक्वाथरसादिभिः उष्णैर्घटं प्रपूर्य

कंवलादिवेष्टितैः १

पृ॰

स्वा पार्श्वे छिद्रं विधाय च विमुखास्यं त्रिखंडं च धातुजं काष्ठजं तथा षडंगुलास्यं गोपुच्छां नाडीं पुंस्या
ऋ त्रिंशुंडिका सुखा परिवृत्तमभ्यक्तं गुरुप्रावरणावृतं हस्तिशुंडिकया नाड्या स्वेदयेद्वातरोगिणम् पुरु
षायाममात्रां वा भूमिमुत्कीर्य खादिरैः काष्ठैर्दग्ध्वा तथा भुज्य क्षीर धान्याम्लवारिभिः वातघ्नपत्रै
राच्छाद्य शयानं स्वेदयेन्नरम् एवं माषादिभिः स्विन्नैः शयानः स्वेदमाचरेत् तथोपनाह स्वेदं च
कुर्याद्वातहरौषधैः प्रदिह्य देहं वातार्त्तं क्षीरमांसरसान्वितैः अम्लपिष्टैः सलवणैः सुखोष्णैः स्ने
हसंयुतैः उपनाहं मांसेर्जीवनीयगणेन च दधिसौवीरकक्षीरैर्वीरतर्वादिना तथा कुल
त्थमाषगोधूमैरतसीतिलसर्षपैः शतपुष्पादेवदारुशेफालीस्थूलजीरकैः एरंडमूलबीजैश्च ६
रास्नामूलकशिग्रुभिः मिशिकृष्णाकुठेरैश्च लवणैरम्लसंयुतैः प्रसारण्यश्वगंधाभ्यां बलाभ्यां दश कृष्ण
मूलकैः गुडूच्या वानरीबीजैर्यथालाभं समाहृतैः क्षुण्णैः स्विन्नैश्च वस्त्रेण बद्धैः संस्वेदयेन्न
संक्षेपं रं महाशाल्वणयोगोऽयं सर्वानिलार्त्तिहृत् द्रवस्वेदस्तु वातघ्नद्रव्यक्वाथेन पूरितम् कटाहे
कोष्ठकं वापि स्नेहपूर्णे विशेदवगाहयेत् नाभेः षडंगुलं यावन्मग्नः कोष्णस्य धारया कोष्णया स्वे
द्योः सिक्तः स्निग्धः स्निग्धतनुर्नरः एवं तैलेन दुग्धेन सर्पिषा स्वेदयेन्नरम् एकांतरं द्व्यंतरं वा

स्नेहयुक्तोऽवगाहने शिरामुखैर्लोमकूपैर्धमनीभिश्च तर्पयेत् शरीरे बलमाधत्ते युक्तः स्नेहावगाहने
जलसिक्तस्य वर्धंते यथा मूलेंऽकुरास्तरोः तथा धातुविवृद्धिर्हि स्नेहसिक्तस्य जायते नातः परतरः
कश्चिदुपायो वातनाशनः कार्पासास्थिकुलत्थिका तिलयवैर्माषातसी यष्टिकामुद्गैरंडपुनर्नवा
युगुलैकधान्याम्लसिक्तैः स्वेदोऽयं हि भवेत्तु धेनिगदितो वातामयानां हितो हन्यात्पन्न रुजं त्रि
कगतां पार्श्वाघ्रिकं घस्मरगाम् शीतकालेऽपरमस्तभोऽरक्तनिग्रहे दीप्तेऽग्नौ मार्दवे जाते स्वेदनाद्वि
रतिर्मता इतिषष्ठः स्वेदविधिः ५ तत्रादौ अथ वमनम् शरत्काले वसंते च प्रावृट्काले च देहिनाम्
वमनं रेचनं चैव कारयेत्कुशलो भिषक् बलवंतं कफव्याप्तं हृल्लासादिनिपीडितम् तथा वमनसा
त्म्यं च धीरचित्तं च वामयेत् विषदोषे स्तन्यरोगे मंदाग्नावश्लीपदेऽर्बुदे हृद्रोगकुष्ठवीसर्पमेहाजीर्णभ्र
मेषु च विदारिकापची कासश्वासपीनसवृद्धिषु अपस्मारज्वरोन्मादे तथा रक्तातिसारिषु ना
सा ताल्वोष्ठपाके च कर्णस्रावेऽधिजिह्वके गलशुंडयामतीसारे पित्तश्लेष्मगदे तथा मेदोगदेऽरुचौ चैव
वमनं कारयेद्भिषक् न वामनीयस्तिमिरी न गुल्मी नोदरी कृशः नातिवृद्धो गर्भिणी च न स्थूलो

न तृष्णातुरः मदार्त्तो बालको रूक्षः क्षुधितश्चानिरूहितः उदावर्त्त्यूर्ध्वरक्ती च दुश्छर्दिः केवला
निली पाण्डुरोगी कृमिव्याप्तः पठना स्वरघातकः एतेप्यजीर्णे कुपिता वाम्या ये विषपीडिताः कफ
व्याप्ताश्च ते वाम्या मधुकक्वाथपानतः सुकुमारं कृशं बालं वृद्धं भीरुं च वामयेत् पीत्वा यवागूमाकं
ठं क्षीरतक्रदधीनि वा असात्म्यैः श्लेष्मलैर्भोज्यैर्दोषानुत्क्लेश्य देहिनः स्निग्धस्विन्नाय वमनं
दत्तं सम्यक् प्रवर्त्तते वमने च सर्वेषु सैंधवं मधु वा हितम् बीभत्सं वमनं दद्याद्विपरीतं विरेचनं
क्वाथद्रव्यस्य कुडवं श्रपयित्वा जलाढके अर्द्धभागावशिष्टं च वमनेष्ववतारयेत् क्वाथपानेन
व प्रस्था श्रेष्ठा मात्रा प्रकीर्त्तिता मध्यमा च शिमिता प्रोक्ता त्रिप्रस्था च कनीयसी कल्कचूर्णा १०
वलेहानां त्रिपलं श्रेष्ठमात्रया मध्यमं द्विपलं विद्यात्कनीयस्तु पलं भवेत् वमने चापि वेगाः कृष्ण
स्युरष्टौ पित्तांता उत्तमाः षड्वेगा मध्यवेगाश्च चत्वारस्त्ववरा मताः वमने च विरेके च तथा श्रो
णितमोक्षणे अर्द्धत्रयोदशपलं प्रस्थमाहुर्विचक्षणाः कफं कटुकतीक्ष्णोष्णैः पित्तं स्वादुहिमै
र्जयेत् सुस्वादुलवणाम्लोष्णैः संसृष्टं वायुना कफम् कृष्णाराठफलं सिंधु कोष्णं कोष्णजलेन पिबेत्

पटोलवासानिंबैश्च पित्ते शीतं जलं पिबेत् सश्लेष्मवातपीडायां सक्षीरं मदनं पिबेत् अजीर्णी
कोष्णपानीयं सिंधु पीत्वा वमेत्सुधीः वामनं पाययित्वा तु जानुमात्रासने स्थितम् कंठमेरंडना
लेन स्पृशंतं वामयेद्भिषक् प्रसेको हृद्ग्रहः कोठः कंडूः छर्दिति भवेत् अतिवांते भवेत्तृष्णा हिक्का हृत्
रो विसंज्ञता जिह्वानिस्सर्पणं चाक्ष्णोर्व्यावृत्तिर्हनुसंहतिः रक्तच्छर्दिष्ठीवनं च कंठपीडा च जायते
वामनस्यातियोगेन मृदु कुर्याद्विरेचनं वमनातः प्रविष्टायां जिह्वायां कवलग्रहः स्निग्धाम्ललवणो
ह्यैर्घृतक्षीररसैर्हितैः फलान्यम्लानि खादेयुस्तस्य चाग्रे तथा नराः निःसृतां तु तिलद्राक्षाक
ल्कलिप्तां प्रवेशयेत् व्यावृत्ते चाक्ष्णोर्घृताभ्यक्ते पीडयेच्च शनैः शनैः हनौ मोक्षे स्मृतः स्वेदो रक्तच्छर्दि
विधिः पुनः धात्रीरसांजनोशीरलाजचंदनवारिभिः क्वाथं कृत्वा पाययेच्च सघृतक्षौद्रशर्करम्
ग्राम्यं त्यनेन नश्यत्यस्माद्याः पीडाश्छर्दिसमुद्भवाः हृत्कंठशिरसां शुद्धिर्दीप्ताग्नित्वं च लाघवं कफ
पित्तविनाशश्च सम्यग्वांतस्य चेष्टितम् ततः पराह्णे दीप्ताग्निर्मुद्गषष्टिकशालिभिः हृद्यैश्च जांग
लरसैः कृत्वा यूषं च भोजयेत् तंद्रानिद्रास्यदौर्गंध्यं पाण्डुत्वं गरहृद्गरं सुवांतस्य न पीडा भव

स्नेहकाले च न अजीर्णं शीतपानीयं व्यायामं मैथुनं तथा स्नेहाभ्यंगौ प्रदेहांश्च दिने तं वर्जयेत्सु
धीः इति वमनविधिः ५ तरंगः अथ विरेकः स्निग्धस्विन्नस्य वांतस्य दद्यात्सम्यग्विरेच
नम् अवांतस्य त्वधः स्रस्तो ग्रहणीं छादयेत्कफः मंदाग्निं गौरवं कुर्याज्जनयेद्वा प्रवाहि
काम् अथवा पाचनै रामं बलासं च विपाचयेत् पित्ते विरेचनं युंज्यादामोद्भूते गदे तथा
उदरे च तथाध्माने कोष्ठशुद्धौ विशेषतः दोषाः कदाचित्कुप्यंति जिता लंघनपाचनैः ये तु
संशोधनैः शुद्धा न तेषां पुनरुद्भवः बालवृद्धावतिस्निग्धः क्षतक्षीणो भयान्वितः श्रां ३१
तस्तृषार्त्तः स्थूलश्च गर्भिणी च नवज्वरी नवप्रसूता नारी च मंदाग्निश्च मदात्ययी
शल्यार्द्दितश्च रूक्षश्च न विरेच्या विजानता जीर्णज्वरी गरव्याप्तो वातरक्ती भगंदरी अ
र्शःपांडूदरग्रंथिहृद्रोगारुचिपीडिताः योनिरोगप्रमेहार्त्तगुल्मप्लीहव्रणार्द्दिताः विद्र
धिच्छर्द्दिविस्फोटविषूचीकुष्ठसंयुताः कर्णनासाशिरोवक्त्रगुदमेढ्रामयान्विताः प्लीह
शोथाक्षिरोगार्त्तकृमिक्षारानिलार्द्दिताः शूलिनो मूत्रघातार्त्ता विरेकार्हा नरा मताः

वह्निपित्तो मृदुः प्रोक्तो बहुश्लेष्मा च मध्यमः बहुवातः क्रूरकोष्ठो दुर्विरेच्यः स कथ्यते मृद्वी मात्रा मृ
दुकोष्ठे मध्यकोष्ठे तु मध्यमा क्रूरे तीक्ष्णा मता द्रव्यैर्मृदुमध्यमतीक्ष्णैः मृद्वी द्राक्षापयश्चंचुतैलै एरंडतैलैः २
रपि विरिच्यते मध्यमस्त्रिवृता तिक्ताराजवृक्षैर्विरिच्यते क्रूरः स्नुक्पयसा हेमक्षीरीदंतीफलादि
भिः मात्रोत्तमा विरेकस्य त्रिंशद्वेगाः कफांतकृत् वेगैर्विंशतिभिर्मध्या हीनोक्ता दशवेगकैः द्विप
लं श्रेष्ठमाख्यातं मध्यमं च पलं भवेत् पलार्द्धं च कषायाणां कनीयस्तु विरेचनम् कल्कमोदक
चूर्णानां कर्षं मध्वाज्यलेहतः कर्षद्वयं पलं वापि दद्याद्रोगाद्यपेक्षया पित्तार्त्ते त्रिवृच्चूर्णं द्राक्षाक्वा
थादिभिः पिबेत् त्रिफलाक्वाथगोमूत्रैः पिबेद्व्योषं कफार्दितः त्रिवृत्सैंधवशुंठीनां चूर्णमम्लैः
पिबेन्नरः वातार्दितो विरेकाय जांगलानां रसेन वा एरंडतैलं त्रिफलाक्वाथेन द्विगुणेन वा
पक्वं पीतं पयोभिर्वा न चिरेण विरिच्यते त्रिवृताकौटजं बीजं पिप्पलीविश्वभेषजम् समृद्वी
कारसं क्षौद्रं वर्षाकाले विरेचनम् त्रिवृद्दुरालभातिक्त्यशर्करामुस्तचंदनं द्राक्षांबुना सयष्टि
ह्याह्वं शीतलं च घनात्यये पिप्पलीनागरं सिंधुश्यामात्रिवृतया सह लिहेत्क्षौद्रेण शिशिरे

वसंते च विरेचनम् त्रिवृता शर्करा तुल्या ग्रीष्मकाले विरेचनम् अभया मरिचं शुंठी विडंगामल
कानि च पिप्पली रसप्लं त्वकू पत्रं मुस्तमेव च एतानि सम भागानि दंत्यत्र त्रिगुणा भवेत् त्रि
वृदष्टगुणा ज्ञेया षड्गुणा च सिता भता मधुना मोदकान् कृत्वा कर्षमात्र प्रमाणतः एकैकं भक्षयेत्प्रा
तः शीतं चानुपिवेज्जलम् तावद्विरिच्यते जंतुर्यावदुष्णं न सेवते पानाहारविहारेषु भवेन्नियंत्र
णः सदा विषमज्वरमंदाग्निपांडुकासभगंदरान् वाताम्लकुष्ठगुल्मार्शो गलगंडभ्रमोदरान् वि
दाहप्लीहमेहांश्च यक्ष्माणं नयनामयान् वातरोगांस्तथाध्मानं मूत्रकृच्छ्राणि चाश्मरीम् पृष्ठपा
र्श्वोरुजघनजंघोदररुजं जयेत् सततं शीलनादस्य पलितानि विनाशयेत् अभयामोदको प
रो रसायनमनुत्तमम् इत्यभयामोदकः मदीयं मृद्वीका कुटरोहिणी जलधरः शम्याक मज्जा १२
शिवा कृष्णामूलपटोलिका त्रिवृद्दिला कृष्णीयपत्रे समं संक्वाथ्याम्बु निपीत एष मलगणाः संरेच कृष्ण
येदल्पतां दत्वाग्निमगिनसे विनिमिलागृह स्थितमानवम् पीत्वा विरेचनं शीतजलैः सं
सिच्य चक्षुषी सुगंधि किंचिदाघ्राय तांबूलं शीलयेद्वरम् निवातस्थो न वेगांश्च धारयेन्न

मदीयं त्र्यो[?] वैरला मुस्त विडंग पत्र मरिच समभक्त लवंग सर्वेभ्यो द्विगु त्रिवृता कंदं प्रवलमलहरं मुख्यकं वंधम्

स्वपेत्तथा शीतांबुनस्पर्शो क्वापि को ष्णं नीरं पिवेन्मुहुः वलासौ षधपित्तानि वायुश्चैतेयथा व्रजे
त् रेकात्तथा मलं पित्तं भेषजं च कफो व्रजेत् दुर्विरिक्तस्य नाभेस्तु स्तब्धत्वं कुक्षिशूलता पुरी
षवातसंगश्च कंडूमंडलगौरवम् विदाहो रुचिराध्मानं भ्रमश्छर्दिश्च जायते तं पुनः पाचनैः स्नेहैः
पक्त्वा संस्नेह्य रेचयेत् तेनास्योपद्रवा यांति दीप्ताग्निर्लघुता भवेत् विरिक्तस्यातियोगेन मूर्छा भ्रं
शो गुदस्य च शूलं कफातियोगः स्यात् मांसधावनसन्निभम् मेदोनिभं जलाभासं रक्तं वापि
विरिच्यते तस्य शीतांबुभिः सिक्त्वा शरीरं तंडुलांबुभिः मधुमिश्रैस्तथा शीतैः कारयेद्वमनं मृ
दु सहकारत्वचः कल्केन दध्ना सौवीरकेण वा पिष्टेनाभिप्रलेपेन हंत्यतीसारमुल्वणम् अजा
क्षीरं विलेवा पि वैष्किरं हारिणं तथा शालिभिः षष्टिकाभिः स्वल्पं मसूरैर्वापि भोजयेत् शीतैः सं
ग्राहिभिर्द्रव्यैः कुर्यात्संग्रहणं भिषक् लाघवे मनसस्तुष्टौ अनुलोमं गते निले सुविरिक्तं नरं ज्ञात्वा
पाचनं पाययेन्निशि इंद्रियाणां वलं बुद्धिप्रसादो वह्निदीप्तिता धातुस्थैर्यं वयस्स्थैर्यं भवेद्रेच

मदीयं शिवा कृष्णामूलं त्रिकटु कम जाजी जलधरस्त्रिवृत्धात्री भसीतरूप पटु विडंगाः मरसुमंदलंकृष्ठं हिंगु ज्वलनपतिसपिष्यमङुलं

जैरेणवगुडेर्मेलहरीमिदं हस्वरूपयसा ॥

जेपालं रहितं त्वगं कुरसत्ताभिर्भिते माक्षिके निद्दिष्टं अप्रहस्तु स्तोयविमलं खल्वे सवासे सोर्द्दितं । लिप्तं नूतन खर्परेषु विगतस्नेहं रजः सन्नि भंनिं कुकांतु विभावितं च वहुधाः कुकाउ गाछं भवेत्

नसेवनात् प्रवातसेवां शीतांबुस्नेहाभ्यंगाम जीर्णताम् व्यायामं मैथुनं चैव न सेवेतविरेचि
तः शालिषष्टिकमुद्गाद्यै पेयाद्यं भोजयेत्कृतो जयपालविशुद्धि सागं वारसैः शाल्योदन हितं
शार्ङ्गधरात् शंभोर्बीजं सटंकं व लिमरिचयुतं व्योषचूर्णं चतुल्यं पालेनेकं भवीजं समशिखिस
हितं मर्द्दितं यामेमेकं भुक्तं गुंजा द्विमात्र शिशिरजलयुतं स्पत्तसंतमष्टमुद्धारिच्छाभेदीरसोयं प्रव
लमलहरः सर्वरोगैकहर्त्ता सारसंग्रहात् जेपालेन समैः सूतवोवटंकेरागंधकैः नारस्य
साप्रसो माषमात्रः सर्पिः सितायुतः हंतिसंग्रहमानाहमामशूलं नवज्वरम् वेलाज्वरैवि १३
रेकेण शीतलांबु निषेवणात् नारायणः रसरत्नप्रदीपात् शुंठीतीक्ष्णामरीचटंकणवृति कृष्ण
प्रोक्तं समं तत्रि धा कुंभीबीजयुतं विमर्द्य स भवेदिच्छाविभेदीरसः वल्लः शार्करयाधितो
पचुलुकेपुंसः सुखेरेच्चये न्निःशेषं मलदोषमेघविनिहंत्युद्यैश्चयंभंहरिः इतिपो॰ विरेक
विधि॰ ७ तरंगः अथ वस्तिविधिः वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परम् यः स्ने

निस्तुषाः शुद्धजेपाला मरिचं तु द्विभागिकं । निंबुमर्द्दितं चैव आभांतेस्माद्धिरेचनं

हैर्दीयते स स्यादनुवासननामकः कषायक्षीरतैलैर्वा निरूहः स निगद्यते वस्तिभिर्दीयते य
स्मात्तस्माद्वस्तिरिति स्मृतः मृगगोशूकरगवां महिषस्यापि वा भवेत् मूत्रकोशस्तु वस्तिः स्यात्तदलाभे
न्यचर्मजः नेत्रं कार्यं सुवर्णादिधातुभिः वृक्षवेणुभिः नलैर्दंतैर्विषाणाग्रैर्मणिभिर्वा विधीयते आतु
रांगुष्ठमानेन मूले स्थूलं विधीयते कनिष्ठिकापरिणाहमग्रे च गुटिकामुखम् मुद्गच्छिद्रयुतं व
र्षे गोपुच्छसदृशाकृति षडंगुलमितं तच्च किंवास्याद्वादशांगुलं योजयेत्तत्र वस्तिं च वद्धा पविं धानु
तः उत्तमस्य पलैः षड्भिर्मध्यमस्य पलैस्त्रिभिः पलेनार्द्धेन हीनस्य युक्ता मात्रानुवासने भोजयि
त्वा यथाशास्त्रं कृतचंक्रमणां ततः उत्सृष्टानिलविण्मूत्रं योजयेत् स्नेहवस्तिना सुप्तस्य वामपार्श्वे
वा वामजंघाप्रसारिणः आकुंचितान्यजंघस्य नेत्रं स्निग्धं गुदे न्यसेत् वामेन पाणिना वस्ति
कंठमालंब्य धीरधीः वस्तिं संपीडयेत्सव्येनात्यधोवेगोन्यपाणिना जृंभाकासक्षवादींश्च वस्ति
काले न कारयेत् त्रिंशन्मात्रामितः कालः प्रोक्तो वस्तेस्तु पीडने जाते विधाने तु ततो कुर्यान्निडं

यथासुखं संतैलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु उपद्रवं विना चैव स सम्यगनुवासितः अनेन वि
धिनोद्दिष्टाः सप्त वा षट् च बस्तयः अनायाते त्वहोरात्रे स्नेहे संशोधनैर्हरेत् अतिसंक्षेपतः प्रोक्तो
बस्तिरेषोनुवासनः अथ निरूहः निरूहबस्तिर्बहुधाभिधते कारणांतरैः तैरेव तस्य नामानि
कृतानि मुनिपुंगवैः निरूहस्यापरं नाम प्रोक्तमास्थापनं बुधैः स्वस्थानस्थापनाद्दोषधातू
नां स्थापनं मतम् निरूहस्य प्रमाणं च प्रस्थं पादोत्तरं मतं मध्यमं प्रस्थमुद्दिष्टं हीनं च कुडवास्त्र
यः अतिस्निग्धः क्लिष्टदोषः क्षतोरस्कः कृशस्तथा आध्मानच्छर्दिहिक्कार्शः कासश्वासप्रपी १४
डितः गुदशोफातिसारार्त्तो विषूचीकुष्ठसंयुतः गर्भिणी मधुमेही च नास्थाप्यश्च जलोदरी
वातव्याधावुदावर्त्ते वातासृग्विषमज्वरे मूर्छातृष्णोदरानाहमूत्रकृच्छ्राश्मरीषु च वृद्ध्यसृग्द
रमंदाग्निप्रमेहेषु निरूहणं गुडतिक्तिडीककुडवस्तु भवेदपि चात्र मूत्रकुडवद्वितयं च मिसिपाठ
रामठकसिंधुयुतं तन्न निरूहणं तु विहितं मुनिभिः इति निरूहबस्तिः अतः परं प्रवक्ष्यामि बस्ति

मुत्तरसंज्ञितम् द्वादशांगुलमानेन नेत्रं वा समकर्णिकं मालतीपुष्पवृंताभं छिद्रं सर्षपनिर्गमं
पंचविंशतिवर्षाणामधो मात्राद्विकार्षिकी तदूर्ध्वं पलमात्रा हि स्नेहस्योक्ता भिषग्वरैः स्थित
स्य जानुमात्रे च पीठे न्युब्जशलाकया स्निग्धया मृदु मार्गं च ततो नेत्रं नियोजयेत् अनुवासक्रमः
सर्वो ह्यन्योत्रापि निवेदितः स्त्रीणां दशांगुलं नेत्रं स्थूलं प्रोक्तं कनिष्ठया मुखछिद्रं तन्नयोज्य
योन्यंतश्चतुरंगुलं द्व्यंगुलं मूत्रमार्गे तु सूक्ष्मनेत्रं नियोजयेत् मूत्रकृच्छ्रविकारेषु बालानामेक
मंगुलं योनिमार्गेषु नारीणां स्नेहमात्रा द्विपालिका द्विकार्षिकी च बालानां मूत्रमार्गे निरूपि
ता बस्तौ शुक्ररजः पुंसां स्त्रीणामार्त्तवजा रुजः हन्यादुत्तरबस्तिस्तु नोचितो मेहिनां क्वचित्
नेत्रसंतर्पणार्थं च नेत्रबस्तिं प्रकल्पयेत् वातातपरजोहीनदेशे चोत्तानशायिनः नेत्रद्वंद्वे
परित्यज्य सार्द्धं च द्व्यंगुलं सर्वतश्चाषचमसीं जलं दत्वा प्रमर्द्दयेत् तेन पिंडेनालवालं दृढं सं
धिविवर्जितं कृत्वा नवनीतेन भृक्तभागद्रवे शौचे पूरयेच्चूर्णपापक्ष्मपरितं नैव जायते नेत्रप
यत्नं कुर्वीत विकासस्तु तथैव च बस्तौ कफसन्निरोधे मात्रा पंच शतं विदुः कफवाते कृशे रोगे स

स्मात्राशतंमतं। दृष्टिरोगे चतुःशतमधिमंथे सहस्रकं। षट्क्रुति कुटिले ह्रस्वे स्याद्द्वादशशतीमता
पित्तरोगे नवशतं सहस्रं वातरोगिणां एकाहं वा त्र्यहं वापि पंचाहं वेष्यते यथा द्रक्ते पागतो नीत्वा
नील्यं विलोकयच्च सुखं निरीक्षयेत् सम्यक् नेत्रवस्तिविधिस्त्वयम् निर्वृतिर्व्याधिशांतिश्चति
या लाघवमेव च सम्यग्योगे सुखं सुप्तिर्वैशद्यं वर्णपाटवं शूलपाकाश्रुपातगुरुतामोगध्वं स्याद्
तितर्पिते रूक्षाविलं सरक्तं च नेत्रं स्याद्धीनतर्पितम् रूक्षः स्निग्धः क्रमश्चात्र प्रयोज्यः संप्र
दापतः वरुदात्रेयात् अभ्यंगः परिषेकश्च पिचुर्वस्तिरिति क्रमात् तैलं मूर्ध्नि चतुर्धैवं
बलवद्युत्तरोत्तरं एतेषां च परा मात्रा यावत्स्रावश्च नेत्रयोः स्वेदो भिरिवतोदश्च केशभूमि
षु जायते स्नेहं पिचुपूतं कृत्वा प्रदद्यान्मस्तकोपरि ऊर्ध्वजत्रुविकारेषु पिचुतैलं प्रशस्यते १५ कृष्ण
शिरोवस्तिश्चर्मकृतो द्विमुखो द्वादशांगुलः शिरः प्रकामाणांतं कृत्वा चर्मैवं घनपट्टएतत् अ
प्यवासंधितो यं च चमसीभिः प्रयोजयेत् ततस्तैलं न्यसेत्तत्र यावत्स्यात्पूरणं तो भवेत् तावद्धार्य
स्तु यावत्स्यात्कर्णनासामुखस्रुतिः वेदनोपशमो वापि मात्राणां वा सहस्रकं विना भोजनमे

मात्राणां त्रिचतुःपंचषट्सप्तवसुनंदने ॥ शीतेः स्नेहः क्रमाद्याति धातुषु स्नेहणानै ४

वात्र शिरोवस्तिर्विधीयते विमोच्याथ शिरोवस्तिं पुगयत्तु विमर्द्दयेत् इति शिरोवस्तिः दक्षजानु
करावर्त्तं कुर्याच्छोटिकया युतं निमेषोन्मेषकालो यथा मात्रा स्मृता बुधैः अथ कर्णस्य गाहो निरवते
क्रपोहमन्मयपात्रे किंवा पक्वकुस्तूलके ताम्रादिजे पवापात्रे किंवा पाषाणसंभवे आकंठमग्नो निव
सेदहरं प्रातरेव हि रोमांतिषु कूपेषु स्थित्वा मात्राशतत्रयं ततः प्रविशति स्नेहश्चतुर्भिर्गच्छति त्वचम्
पंचभिश्च भजेद्रक्तं षड्भिर्मांसं प्रपद्यते मेदः सप्तभिस्सपृशते षड्भिरस्थि च कुर्जत् नवभिर्याति मज्जानं
ततो मात्रा न कारयेत् ततस्तु हरते रोगान्वातपित्तकफोद्भवान् स्रोतसां मार्दवकरः कफवातविनाश
नः धातूनां पुष्टिजननो बलवर्णकरः परः वातरोगान् शीर्षाश्च जेयदृक्षविशेषतः इत्यवगाहः
रसाद्यैः पूरणं कर्णभोजनात्प्राक्प्रशस्यते तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते स्वेदयेत्कर्णदेशं तु परि
वर्त्तनशायितः मूत्रैः स्नेहरसैः कोष्णैः पूरयेच्च ततो भिषक् स्वस्थस्य पूरणे स्नेहे मात्राशतमवेदने शत
त्रयं श्रोत्ररोगे शिरोरोगे तथैव च कर्णं प्रपूरयेत्सम्यक् स्नेहाद्येर्मात्रया क्ताणा नोच्चैः श्रुतिर्न बाधिर्यं
स्यान्नित्यं कर्णपूरणात् इति पारिजाते कर्णपूरणमात्रे निद्राकरो देहसुखश्च चक्षुष्यः पादरो

क्रा पादत्वग्गुडुकत्तीश्च पादाभ्यंगः प्रशस्यते मंदोसमे सुपर्यंके गतः स्वस्थतमो नरः उत्तानशायी सं
भूय तैलाभ्यंगं समाचरेत् तद्विशेषान स्वाभ्यंगः शिरो नासाऽक्षितापजित् शिरोभ्यक्तेन तैलेन नो
गः किंचिदुपस्थ शेत् तेषां विघ्नोधनं चक्षुरायुः कीर्त्ति प्रज्ञां हरेत् श्रोत्राक्षि वेदले पित्तश्रमसत्तड्दा
हम्भहनुत् वातपित्ते कफरक्ते संनिपाते तथैव च मदमूर्छाप्रलापेषु तृष्णाजीर्णज्वरेषु च संतर्पू
सतता जीर्णे मार्गश्रांते विशेषतः बाले वृद्धे तरुणे तैलाभ्यंगः सदोत्तमः कृष्णात्रेयात् इति
ष्णा॰ वत्तिविधिः ८ तरंगः अथ नस्यम् नस्यं तत्कथ्यते धीरैर्नासाग्राह्यं पदोषधं नावनं नस्यक
र्मेति तस्य नामद्वयं मतम् तस्य भेदद्वयं प्रोक्तं रेचनं स्नेहनं तथा रेचनं कर्षणं प्रोक्तं स्नेहनं वृंहणं
मतं कफपित्तानिलध्वंसे पूर्वमध्यापराह्णके दिनस्य गृह्यते नस्यं रात्रावप्युत्कटे गदे नस्यं त्यजे १६
द्दुर्दिने दोभोजने चापतर्पितः तथानव प्रतिश्यायी गर्भिणी गरदूषितः अजीर्णादित्तवस्तिश्चपी कृमुर्म
तस्नेहोदकासवः क्रुद्धः शोकाभिभूतश्च तृष्णार्त्तो वृद्धबालकौ वेगावरोधी स्नातश्च स्नातुकामश्च
वर्जयेत् आसप्तवर्षस्य बालस्य नस्यकर्म समाचरेत् अशीतिवर्षाद् ऊर्ध्वं तु नावनं नैव दीयते अथोवि

नस्यं रेचनं ग्राह्यं तैलैः सुतीक्ष्णकैः तीक्ष्णभेषजसिद्धैर्वा स्नेहैः क्वाथैस्तथा रसैः नासिकारंध्रयोरेकैकश्च
द्विबिन्दवः प्रत्येकं रेचने योज्य मुख्य मध्याल्पमात्रया नस्यकर्मणि दातव्यं शाणैकं तीक्ष्णभेष
धं हिंगुस्याद्यवमात्रं तु माषैकं सैंधवं मतं क्षीरं त्वेवाष्टशाणं स्यात् तथा नीरं तु त्रिकार्षिकम् कार्षि
कं मधुरद्रव्यं नस्यकर्मणि योजयेत् षडंगुलाद्विवक्त्राया नल्या चूर्णं तथा धमेत् तीक्ष्णं कालमितं
वक्त्रवातैः प्रधमनं हितम् नस्यं स्यात् शुंठिभृंगी पिप्पली सैंधवेन वा जलपिष्टेन तेनाशु कर्णना
सा शिरोगदाः मन्याहनुगलोद्भूता नश्यंति भुजपृष्ठजाः मधूकसारकृष्णाभ्यां वचामरिचसैं
धवैः नस्यं कोष्णजलैः पिष्टैर्दद्यात् संज्ञाप्रबोधने अपस्मारे तथोन्मादे सन्निपाते पतंत्रके सैंध
वं श्वेतमरिचं सर्षपाः कुष्ठमेव च वस्तमूत्रेण पिष्टानि नस्यं तंद्रानिवारणं रोहितमत्स्यपित्तेन भा
वितं मरिचं वचा कंकोलं चेति चूर्णं वै देयं प्रधमनं बुधैः अथ वृंहणं मर्शश्च प्रतिमर्शश्च
द्वौ भेदौ स्नेहने मतौ मर्शस्तर्पणी मात्रा मुख्या शाणोः स्मृताष्टभिः मध्यमा च चतुःशाणो हीं
ना शाणमिता मता एकैकस्मिंस्तु मात्रेयं देया नासापुटे बुधैः मर्शश्च द्वित्रिवेलं तु दष्णोदोष

वलावलं स्फोतरेकं तेरेवा नस्यं हृक्षुमिच्चत्तरा: त्र्यहं पंचाहमथवा सप्ताहं वा सुयंत्रितः मर्शः शि
रो विरेकेच व्यापदो विविधाः स्मृताः दोषोत्क्लेशात् क्षयाच्चापि विज्ञेयास्ताः यथाक्रमम् शिरोना
साक्षिरोगेषु सूर्यावर्त्तार्धभेदके दंतरोगे बलेहीने मन्या बाहुरुजे गदे मुखशोषे कर्णनादे वातपि
त्तगदे तथा अकालपलिते चैव केशश्मश्रुप्रपातने युज्यते बृंहणं नस्यं स्नेहैर्वा मधुरद्रवैः
यथा॰ सशर्करं पयः पिष्टं भक्ष माज्येन कुंकुमं नस्य प्रयोगतो हन्याद्वातपित्तभवा रुजः भ्रू
शंखाक्षि शिरः कर्णा सूर्यावर्त्तार्धभेदकाः नस्यस्यात्तिलतैलेन तथा नारायणेन वा माषादि
ना वा सर्पिर्भिस्तद्वेषजसुसाधितैः तैलं कफस्याद्धृतेच्चकेवलपवनेच्चसा दद्यान्नस्यं सदा
पित्ते सर्पिर्मज्जानमेव वा माषात्मगुप्तारास्नाभिर्बलारुचकैरा हिंगुः कृताश्वगंधया क्वाथो
हिंगुसैंधवसंयुतः कोष्णो नस्य प्रयोगेण पक्षाघातसकंपकं जयेदर्दितवातंच मन्यास्तंभा
वबाहुके प्रतिमर्शस्य मात्रातु द्वित्रिविंदुमिता मता प्रत्येकशो नासिकयोः स्नेहनेतिविनि
क्षितं स्नेहे ग्रंथिद्वयं यावन्निमग्नं चोद्धृतं ततः तर्जन्या श्रवस्त्वेवत्तस्याद्यः सविंदुरुदाहृतः २८ कृष्ण

एवं विधैरष्टसंख्यैर्विंदुभिः शाणउच्यते संद्येमर्शनस्यस्य प्रतिमर्शोद्विविंदुकः समयाः प्रतिम
र्शस्य बुधैः प्रोक्ताश्चतुर्दश प्रभाते दंतकाष्ठांते गृहान्निर्गमने तथा व्यायामाध्वव्यवायांते वि
रामे श्रोतंजने कृते कवलांते भोजनांते दिवास्वप्नोत्थिते तथा वमनांते ततः सायं प्रतिमर्शः प्रयु
ज्यते प्रतिमर्शेन शाम्यंति रोगाश्चैवोर्ध्वजत्रुजाः विभीतनिंबकंभारीशिवाशेलुश्चकाकिनी
एकैकं तैलनस्येन पलितं नश्यति ध्रुवम् द्वितीयो॰ नस्यविधिः ३ तरंगः अथ धूमपानम्
धूमस्तु षड्विधः प्रोक्तो शमनो बृंहणस्तथा रेचनः कासहश्चैव वामनो व्रणशोधनः शमनस्य
तु पर्यायो मध्यः प्रायोगिकस्तथा बृंहणस्य तु पर्यायो स्नेहनो मृदुरेचनः रेचनस्य तु पर्यायो
शोधनस्तीक्ष्ण एव च अधूमार्हाः श्रमत्वे तुशीती भीतश्च दुःखितः दत्तवस्ति विरिक्तश्च
रात्रौ जागरितस्तथा पिपासितश्च दाहार्त्तस्तालुशोषी तथोदरी शिरोभितापी तिमिरी छ
र्दी ध्मानप्रपीडितः क्षतोरस्कः प्रमेहार्त्तः पांडुरोगी च गर्भिणी रूक्षः क्षीणो व्यवहृतक्षीर

दोऽघ्नतास्यः भुक्तान्नं दधिमत्स्याश्च बालो वृद्धः कृशस्तथा । अकाले चातिपीतश्च धूमः कुर्या
दुपद्रवान् धूमो हृच्छ्राको दूर्ध्वं हृच्छतेशीतितो न च कासश्वासप्रतिश्यायमन्याहनुशिरोरुजः
वातश्लेष्मविकाराश्च हन्याद्धूमः सुयोजितः धूमप्रयोगात्पुरुषः प्रसन्नेन्द्रियवाङ्मनाः दृढकेश
द्विजश्मश्रुः सुगंधिवदनो भवेत् वदनेन पिबेद्धूमं वदनेनैव संत्यजेत् नासिकाभ्यां ततः पीत्वा मुखे
नैव वमेत्सुधीः शरावसंपुटे दिप्ताकल्कं मनःशिलादि पितम् छिद्रे नेत्रं निवेश्याथ व्रणान्तेनैव धू
पयेत् एलादिकल्कं शमनं स्निग्धं सर्जरसं मदः रेचनं तीक्ष्णकल्कं च कासघ्नं तु द्विकोषणं
वामने स्नायुचर्माद्युद्धाद्धूमस्य पानकं व्रणे निंबवचाद्यं च धूपनं तु प्रशस्यते अन्येपि धूमा ३६ धूम
गेहेषु कर्त्तव्या रोगशांतये मयूरपिच्छं निंबस्य पत्राणि वृहतीफलं मरिचं हिंगु मांसी च बीजं का
र्पाससंभवं छागरोमाहिनिर्मोकं विष्ठा वैडालकी तथा गजदंतश्च तच्चूर्णं किंचिद्घृतविमिश्रि
तं गेहेषु धूपनं दत्तं सर्वान्बालग्रहान्जयेत् पिशाचान्राक्षसान्हत्वा सर्वज्वरहं भवेत् ॥
इत्यपराजिता धूपः नेत्राणि धातुजान्याहुर्नलं वंशभवान्यपि चतुर्विंशात्यंगुलानि खंडानि

त्रीण्युक्तितः योजितानि त्रिखंडेयं नलिका न त्रसंस्थिता इतियोः धूमपानविधिः ॥ नरंगः
अथ रक्तस्रुतिः शरत्काले स्वभावेन कुर्याद्रक्तस्रुतिं नरः त्वग्दोषा ग्रंथिशोफाद्या न स्युः रक्तस्रु
तेर्युतः विस्रता द्रवता रागः स्पंदनं लघुता तथा भूम्यादिपंचभूतानामेते रक्ते गुणाः स्मृताः
इंद्रगोपप्रभं तप्ये प्रकृतिस्थमसंहतं अन्यत्सर्वं भवेद्दुष्टं हि विज्ञेयं रुधिरं नृणां शोथे दाहेंगपा
के च रक्तवर्णे असृजः स्रुतौ वातरक्ते तथा कुष्ठे सपीडे दुर्जये निले पाणिरोगे श्लीपदे च विषदु
ष्टे च शोणिते ग्रंथ्यर्बुदापचीक्षुद्ररोगरक्ताधिमंथिषु विदारीस्तनरोगेषु वपुषश्चापि गौर
वे रक्ताभिष्यंदतंद्रायां पूतिघ्राणास्यदेहतेव यकृत्प्लीहविसर्पेषु विद्रधौ पिडिकोद्गमे कर्णौष्ठ
घ्राणवक्त्राणां पाके दाहे शिरोरुजि उपदंशे रक्तपित्ते रक्तस्रावः प्रशस्यते शुक्ररोगक्षमं गौर्वा
जातो कोलाबुकैरपि अथवापि शिरावेधैः रक्तमोक्षः प्रशस्यते पंचकर्मविशुद्धस्यापी तस्ने
हस्य चार्शसां सर्वांगशोषयुक्तानामुदरश्वासकासिनां छर्द्यतीसारकुष्ठानां पांडूनां स्विन्न

देहिनां ऊनषोडशवर्षस्य गतसप्ततिकस्य च आघातस्रुतरक्तस्य शिरामोक्षो न शस्यते गृह्णाति
शृंगिका तत्र अंगं दशांगुलमितं बलात् जलौका हस्तमात्रं च तुंबं च द्वादशांगुलं पदमंगुलमात्रं तु शिरास
र्वांगशोधनी रक्तदुष्टेच शिरापि व्याधिर्नैव प्रकुप्यति अतःस्राव्यमावश्यं रक्तं नातिक्रमोहितः
अंधमाक्षेपकं तृष्णां तिमिरं च शिरोरुजं पक्षाघातं श्वासकासौ हिक्कां दाहं च पांडुतां कुरुते
ति स्रुतं रक्तं मरणं वा करोति हि देहस्यात्यत्तिरसृज्जा देहस्तेनैव धार्यते विना तेन व्रजेज्जीवो रक्ते
स्रुते मोहो बुधः शीतोपचारैः कुपिते स्रुतरक्तस्य मारुते कोष्णेन सर्पिषा शोथं सव्यथं परिषेच
येत् क्षीणस्य रक्तक्षिप्रोरभ्रहरिणच्छागमांसजः रसः सम्यक् स्थितः पानं क्षीरं वा षष्टिका हिता
पिडाशांतिर्लघुत्वं च व्याधे रुद्धकसंक्षयः मनःस्वास्थ्यं भवेच्चिह्नं सम्यग्विस्राविते सृजि व्याया
मं मैथुनं क्रोधं शीतस्नानप्रवातकान् एकाशनं दिवानिद्रां क्षारामृकटुभोजनं शोकं वापि म
दाजीरां त्यजेद्यावद्बली भवेत् फेनिलं भवेत्तत्त्वोनिस्तो दि पवनादसृक् विस्रुतं श्यावपी
तामं कोष्णं पित्तेन जायते मंदगं बहलं स्निग्धं मांसपेशीप्रभं कफात् द्विदोषदुष्टे संसृष्टं त्रिदुष्टं

१६
कृष्ण

पूतिगंधकं सर्वलक्षणसंपन्नं कांजिकाभं च जायते विषदुष्टं भवेच्छ्यावं नासिकोन्मार्गगं त
था विस्रं कांजिकसंकाशं सर्वकृच्छ्रकरं भवेत् शार्ङ्गधरात् इतियो० रुधिरमोक्षणविधिः ११
तरंगः अथ नाडीपरीक्षा सद्यःस्नातस्य भुक्तस्य तथा स्नेहावगाहिनः क्षुत्तृषार्तस्य सुप्तस्य
नाडी सम्यङ् न बुध्यते अंगुष्ठमूलभागे या धमनी जीवसाक्षिणी तच्चेष्टया सुखं दुःखं ज्ञेयं काय
स्य पंडितैः स्त्रीणां भिषग्वामहस्ते पादे वामे च यत्नतः शास्त्रेण संप्रदायेन तथा स्वानुभवेन
वै परीक्षेद्यत्नवद्भ्यासाभ्यासादेव जायते अग्रे वातवहा नाडी मध्ये वहति पित्तला अंते श्लेष्म
विकारेण नाडी ज्ञेया विचक्षणैः सर्पजलौकादिगतिं वदंति विबुधाः प्रभंजनेन नाडीं पित्तेन
काकलावकमंडूकादेस्तथा चपलां राजहंसमयूराणां पारावतकपोतयोः कुक्कुटस्य गतिं धत्ते
धमनी कफसंगिनी मुहुः सर्पगतिं धत्ते मुहुर्भेकगतिं शिरा वातपित्तसमुद्भूतां प्रवदंति विच
क्षणाः सर्पहंसगतिं तद्वद्वातश्लेष्मवतीं वदेत् हरिहंसगतिं धत्ते पित्तश्लेष्मान्विता धरा ॥

काष्ठकुट्टोयथाकाष्ठंकुट्टते चातिवेगतः स्थित्वा२ वहंत्येषानाडीसन्निपाते भवेद्ध्रुवं कदाचिच्छीतात
स्पंदते चैकमानेन त्रिंशद्वारंयदा धरा स्वस्थाने नतदा नूनं रोगी जीवति नान्यथा स्थित्वा२
वहतिया साक्षेप्या प्राणघातिनी जिह्वं२ कुटिलं२ व्याकुलं२ स्थित्वा२ वहति भ्रमनी या तिनाश
चसूक्ष्मा नित्यंकंठस्फुरति पुनरप्यंगुलीं संस्पृशेद्वा भावैरेवं बहुविधतरैः सन्निपातादसाध्या
सर्वंपित्तगतिंप्रभंजनगतिंश्लेष्मगतामाविभ्रती स्थानस्वं न भ्रमणंमुहुर्विदधती चक्राधिरू
ढेवया भीमत्वंदधती कलापिगतिका सूक्ष्मत्वमातन्वतीनो साध्यां धमनीं वदंति सुधियो ना
डीगतिज्ञानिनः गंभीरायाभवेन्नाडी साभवेन्मांसवाहिनी ज्वरवेगेन धमनी सोष्णावेग
वती भवेत् कामात्क्रोधाद्वेगवहा क्षीणा चिंताभयप्लुता मंदाग्नेः क्षीणधातोश्च नाडी २० कृष्ण
मंदतरा भवेत् असृक्पूर्णा भवेत्कोष्णा गुर्वी सामा गरीयसी लघ्वी भवति दीप्ताग्नेस्तथा
वेगवती मता चपला क्षुधितस्यापि तृप्तस्य वहति स्थिरा शीघ्रा नाडी मलापातदिनाद्र्धऽ

भिन्नसमोज्वरः दिनैकंजीवितंतस्य द्वितीये म्रियते ध्रुवं मरणोऽमरणोर्यक्षुद्भवेदेकदिनेन च इति
प० नाडीपरीक्षा श्रृतम्ः अथजिह्वापरीक्षा पीता जिह्वा खरस्पर्शा स्फुटिता मारुताधिके रक्त
श्यावाभवेत्पित्ते कफेश्वेतातिपिच्छिला कृष्णा संकंटका शुष्का सन्निपाताधिके तु सा मिश्रितैर्मि
श्रिता ज्ञेयाऽ स्थिलक्षणवर्जिता अथमूत्रपरीक्षाविधिश्च कार्या रोगिमूत्रस्य तत्त्वतः तृणे
नदत्वा तैलस्य बिंदुं तत्र तिलाघवात् विकाशि चेत्तैलमथाम्बुमूत्रे साध्यः स रोगी न विकाशि चे
त्तत् स्यात्कष्टसाध्यस्त्वलगत्त्वसाध्यो नागार्जुनेनैव कृता परीक्षा चर्यटितः नीलं च रक्तं कुपि
ते च वायौ पीतारुणं तैलसमं च पित्ते स्निग्धं कफात्पल्वलवारितुल्यं स्निग्धाप्रसक्ते रुधिर
प्रकोपे मातुलुंगरसाभासं सौवीराभं जलोपमं प्रपाकरहितानां च मूत्रं चंदनसन्निभं अजी
र्णेप्रभवेद्रोगे मूत्रं तंडुलतोयवत् नवज्वरे धूम्रवर्णं बहुमूत्रं प्रजायते पित्तानिले धूम्रज
लाभमुष्णं श्वेतं मरुच्छ्लेष्मणि बुद्बुदाभं तच्छ्लेष्मपित्ते कलुषं सरक्तं जीर्णज्वरे सन्निपाते च

पीतं स्यात्संनिपातोदीपशिखावर्णात्तु वर्णं विधिज्ञेन विचारणीयं पूर्वस्यां वर्धते विंदुर्यदा शीघ्रं
सुखी भवेत् दक्षिणस्यां ज्वरो ज्ञेयस्तथा रोगः क्रमाद्भवेत् उत्तरस्यां यदा विंदोः प्रसरश्च प्र
जायेत आरोग्यता तदा रोगिपुरुषस्य न संशयः वारुण्यां प्रसरेद्विंदुः सुखारोग्यं तदा भवेत्
ईशान्यां वर्धते बिंदुर्ध्रुवं मासेन नश्यति आग्नेय्यां तु तथा ज्ञेयं नैरृत्यां प्रसरेद्यदा छिद्रितं
च भवेत्पश्चाद्ध्रुवं च मरणं भवेत् वायव्यां प्रसरेद्विंदुः सुधायां पिपि विनिश्यति विकासितं ह
लं कूर्मसैरिभाकारसंयुतं करंडमंडलं चापि नरं मूर्धविवर्जितम् गात्रखंडं च मांस्त्रं च
खड्गमुसलपट्टिशं शंखचक्रलगुडं चैव तत्पैव त्रिवृत्तः पश्यं विकृतरूपं नरं दृष्ट्वा न कुर्वीत क्रि २१ कृष्ण
यां क्वचित् हंसकारंडताडागं कुमलं गजचामरं छत्रं च तोरणां हर्म्यं संपूर्णं दृश्यते यदि
